International Journal of Sanskrit Research 2021; 7(4): 174-176

International Journal of Sanskrit Research

अनन्ता

ISSN: 2394-7519
IJSR 2021; 7(4): 174-176
© 2021 IJSR
www.anantaajournal.com
Received: 21-05-2021
Accepted: 24-06-2021

**डा. भोलानाथ दाशः**
सहकारी अध्यापकः स्नातकोत्तर संस्कृत विभागः महाराजा श्रीरामचन्द्र भञ्जदेओ विश्वविद्यालयः तकतपुरम्, बारिपदा, मयुरभञ्ज, ओडिशा, भारत

**Corresponding Author:**
**डा. भोलानाथ दाशः**
सहकारी अध्यापकः स्नातकोत्तर संस्कृत विभागः महाराजा श्रीरामचन्द्र भञ्जदेओ विश्वविद्यालयः तकतपुरम्, बारिपदा, मयुरभञ्ज, ओडिशा, भारत

# संस्कृतवाङ्मये वर्णविमर्शः - एकमवलोकनम्

**डा. भोलानाथ दाशः**

## प्रस्तावना

द्वे ब्रह्मणी वेदितव्ये शब्दपूर्वं परं च यत्।
शब्दब्रह्मणि निष्णातः परंब्रह्माधिगच्छति।।
(महाभारत, शान्तिपर्व, १/२३२/३)

मानवस्य सर्वोत्तमसृष्टिः वर्णः। वर्ण्यते इति वर्णः। द्व्यर्थबोधक वर्णशब्दोऽयम् , एकस्तु शुक्लकृष्णादि वर्णः अपरस्तु अकारादयः वर्णाः । येन स चतुर्द्दशभुवनं स्वायत्तं करोति तथा अतीत-वर्त्तमान-अनागतविषयेषु ज्ञानं लिपिबद्धं करोति आगामीकालनिमित्तम्। कालस्य करालप्रवाहे बहवः वर्णाः विलुप्ताः, यस्य मूकसाक्षीरूपेण शिलालेख-पाण्डुलिपिप्रभृतयः अद्यावधि अस्माकं सविधे वर्त्तन्ते । तेषां वर्णानां व्यवहारोऽपि क्रमशः लोकव्यवहारात् पठनपाठनाच्च दूरीभूतः, यत्र मानवसभ्यतायाः बीजं निहितम् । वर्णस्य उद्भवं विकाशं च बहुप्राचीनकालात् अद्यावधि प्रवहति । उत शुक्रनीतौ उक्तम् छ

कालेऽतीते विस्मृतिर्वा भयं सञ्जायते नृणाम् ।
अनुभूतस्य स्मृत्यर्थं लिखितं निर्मितं पुरा ।।

शब्दब्रह्मणो द्रवरूपं भवति अक्षरम्। येन इदं प्रतिभाषते प्रतिष्ठते वा वेदादिभावेन। वर्णस्य स्वरूपविषये वैदिककालादारभ्य शिक्षाप्रातिशाख्यादिषु विविधेषु शास्त्रेषु गभीरभावेनाध्ययनं विद्यते। ऋक् तथा तैत्तिरीयप्रातिशाख्ये आदिमोऽध्यायः वर्णविषयात्मकः। वाजसनेयीप्रातिशाख्यस्य (वा. प्रा.) अन्तिमेऽध्याये वर्णविषये चर्चा उपलभ्यते। ऋक्प्रातिशाख्यं (ऋ. प्रा.) विहाय अपरे द्वे प्रातिशाख्ये 'अथ' इति पदेन वर्णसमाम्नायस्य अधिकारः सूचितरेव। वा. प्रातिशाख्ये 'अथातो वर्णसमाम्नायं व्याख्यास्यामः' (८/१), तैत्तिरीयप्रातिशाख्ये 'अथ वर्णसमाम्नायः' (२-२) इति सूत्रद्वयमुक्तम् । ऋक्प्रातिशाख्यस्योपो□ते वर्णविषयिकी विस्तृता चर्चा विहिताऽस्ति।

### वर्णः अक्षरं च

ऐतरेयारण्यके (ऐ. आ.) मुख्यतया स्वरः, स्पर्शः तथा ऊष्मविषये आलोचितं अस्ति । एते तु वाचः स्वरूपाः भवन्ति।

पृथिव्या रूपं स्पर्शा अन्तरिक्षस्योष्माणो दिवः स्वराः। अग्ने रूपं स्पर्शा वायोरुष्माण आदित्यस्य स्वराः। ऋग्वेदस्य रूपं स्पर्शा यजुर्वेदस्योष्माणः सामवेदस्य स्वराः। चक्षुषो रूपं स्पर्शाः श्रोत्रस्योष्माणो मनसः स्वराः। प्राणस्य रूपं स्पर्शा अपानस्योष्माणो व्यानस्य स्वराः (ऐ. आ. ३/५)।

णकारः तथा षकारार्थम् तत्रैवोल्लिखितमस्ति, यथा-

तस्यै वा एतस्यै संहितायै णकारो बलं षकारः प्राण आत्मा (ऐ. आ. ३/६)। स यो हैतौ णकारषकारावनुसंहितामृचो वेद सबलां सप्राणां संहिता वेदायुष्यमिति विद्यात्।

वर्णाक्षरयोर्मध्ये भेदोऽस्ति वा न वेत्यस्मिन् विषये विविधा शङ्का प्राचीनकालादारभ्य इदानीं यावत् अमीमांसितभावेन उपतिष्ठते विदूषां मनसि। 'स्वरोऽक्षरम्' (वा. प्रा. १-११, अथर्व प्रा. २-९३) अनुसारं स्वरवर्णाः अक्षरसंज्ञाभवितुमर्हन्ति। उभये त्वक्षराणि (ऋ. प्रा. १-१९) इति सूत्रे स्वरः व्यञ्जनं च अक्षरसंज्ञा भवितुमर्हति । पुनश्च अनन्तरं किञ्चित् विस्तारतया तत्राप्युक्तम्-

सव्यञ्जनः सानुस्वारः शुद्धो वापि स्वरोक्षरम् (ऋ. प्रा. १८-३२)।

महाभाष्येऽपि पतञ्जलिना कारिका एका उक्ता छ

अक्षरं न क्षरं विद्यात् अश्नोतेर्वा स्वरोऽक्षरम्।
वर्णं वाहुः पूर्वसूत्रे किमर्थमुपदिश्यते। (म. भा. द्वितीयाह्निकस्यान्तम्)

तत्रापि चतुर्दशमाहेश्वरसूत्राण्येव अक्षरसमाम्नायत्वेन शेषावतारेण उल्लिखितम्, यथा- सोऽयमक्षरसमाम्नायो....... महीयते (म. भा. द्वितीयाह्निकस्यान्तम्)।
पुनश्च ऐतरेयारण्यके (३.२.३) उक्तम् यत् छन्दपुरुष इति यदवोचामाक्षरसमाम्नाय एव, तस्यैतस्याकारो रसः। अकार वै सर्वा वाक्, सैषा स्पर्शोष्मभिर्व्यज्यमाना बह्वी नामरूपा भवति, अक्षरसमाम्नाय च व्याचक्षते देवसूत्राणि । पुनः महाभाष्यकारेण तु अक्षरसमाम्नायो ब्रह्मराशिः इति निगदितम्। अत्र अक्षरशब्देन व्यञ्जनमपि गृहीतमस्ति।

**वर्णानां सङ्ख्या**

अद्यावधि वर्णानां सङ्ख्याकलने वैमत्यं परिलक्ष्यते व्याकरणसम्बन्धिग्रन्थेषु। स्वयं पाणिनिः माहेश्वरसूत्रे ४३ वर्णाः स्वीकृताः। ऋ. प्रातिशाख्ये ४७ वर्णाः, तै. प्रातिशाख्ये ५२ वर्णाः, वा. प्रातिशाख्ये ६५ वर्णाः उपदिष्टा यथा 'एते पञ्चषष्टिवर्णा ब्रह्मराशिरात्मवाच' (८/२५) इति। ऋक्तन्त्रे ५७ (१४ स्वराः, २५ स्पर्शाः, ४ अन्तस्थाः, ४ ऊष्माणः, विसर्ग, जिह्वामूलीय, उपध्मानीय, अनुनासिक, ४ यम, २ अनुस्वारः)। पुनश्च तत्र विभागद्वयं परिलक्षते यथा एकस्तु उद्देशः अपरस्तु उपदेशः इति।
शिक्षाग्रन्थेष्वपि सङ्ख्याविषयकः सिद्धान्तः न ऐक्यमेव । पाणिनीयशिक्षायाम् उल्लिखितम् - त्रिषष्टि चतुःषष्टिर्वा वर्णाः शम्भूमते मताः (पा. शि. ३) इति ।
कौण्डिन्यशिक्षायां वर्णानां संख्या षष्टि (६०) इत्युल्लिखिता ष्ठ

स्वराः षोडश विज्ञेया स्पर्शाः स्युः पञ्चविंशतिः
अन्तस्थाश्च चतस्रश्चेदूष्माणश्च षडीरिताः
द्यनुस्वारौ विसर्गो ळः स्वरभक्तिश्चतुर्यमाः
वर्णानां षष्टिसंख्याद्युक्तं याजुषो मते (कौ.शि. ५९-६१)।।

षोडशश्लोकीशिक्षायां ६३ वर्णाः निर्देशितम् शिक्षाकारेण यत्।

त्रयस्त्रिंशद्धशावर्णाः स्वराः द्वाविंशतिर्य्यमाः।
चत्वारश्च विसर्गोऽनुस्वारः :कःपस्त्रिषष्टिकाः।। (षो. श्लो. शि. २)

वाशिष्ठीशिक्षायां तु

अष्टषष्टि वदन्त्येके चतुष्षष्टिमथापरे।
त्रिषष्टिमितरे वर्णाः अष्टपञ्चाशतं परे।।
षष्टिश्चतुरधिका वा त्र्यधिका वा लोकवेदयोर्वर्णाः।
अष्टोत्तरपञ्चाशद् वर्णाः स्युस्तैत्तिरीयशाखायाः।। (वा. शि. १-२)

परन्तु टीकायां किञ्चित् परिवर्त्तयन् टीकाकारेणोक्तम्-

अष्टोत्तरषष्टिपक्षाः षष्टिस्तैत्तिरीयशाखायाः (लक्षणमाला-श्लो. ३; वेदलक्षणं पृ. ५२०)

शङ्करानन्दकृत गीतातात्पर्यबोधिन्याम् उक्तमस्ति, यत्-

पञ्चाशद्वर्णरूपेण यया व्याप्तमिदं जगत्।
शब्दब्रह्ममयीं वाणीं भजे तां परदेवताम् ।।

**स्वरवर्णाः**

स्वेन राजते, स्वस्मिन् रमते वा स्वरः, राजे रमेर्वा औणादिको ड प्रत्ययः। यस्योच्चारणे कस्यापि व्यञ्जनस्य साहाय्यं नापेक्षते इत्यर्थः। ऋक्प्रातिशाख्ये शौनकेन स्वरवर्णानामवतारणं कृतम्। तत्र ह्रस्वदीर्घभेदेन द्वादशसङ्ख्यकाः स्वराः गृहीताः सन्ति। ऋ. प्रा. प्रथममण्डलस्य आद्ये द्वे सूत्रे - (१) अष्टौ समानाक्षराण्यादितः, (२) ततश्चत्वारि सन्ध्यक्षराण्युत्तराणि इति। ऋक्शाखिनः पदादिं पदान्तस्थं च ऌकारं स्वरवर्णभावेन न परिगण्यन्ते। यदि वयं पदमध्यस्थं ऌवर्णं स्वरत्वेन स्वीकुर्मः तर्हि एतेषां सङ्ख्या त्रयोदश भवति। परवर्त्तीकाले पाणिनिनापि दीर्घप्लुतरहितत्वेन नवसङ्ख्यकाः स्वरवर्णाः इत्युपदिष्टाः अजिति प्रत्याहारेण।
एतद्विहाय तै. प्रातिशाख्ये 'षोडशादितः स्वराः' इति सूत्रेण स्वराणां सङ्ख्या १६ इति स्थिरीकृता। अत्र वा. प्रातिशाख्ये २३ स्वराः प्राप्यन्ते या संख्या सर्वाधिकी। पाणिनीयशिक्षायां स्वराः २१ इति निर्देशिताः यथा 'स्वराः विंशतिरेकश्च' इति। अतः याज्ञवल्क्यशिक्षायां स्वरव्यञ्जनयोः स्वरूपविषये याज्ञवल्क्येनोक्तम् -

मणिवत् व्यञ्जनान्याहुः सूत्रवत् स्वर इष्यते।
व्यञ्जनान्यनुवर्त्तन्ते यत्र तिष्ठति सः स्वरः।। (या. शि. ११९)

**व्यञ्जनवर्णाः**

व्यज्यते स्वरसाहाय्येनोच्चार्यते यत्तद् व्यञ्जनम्। उक्तं च भाष्ये- 'न पुनरन्तरेणाचं व्यञ्जनस्योच्चारणमपि सम्भवति' इति। सामग्रिकतया वाजसनेयीप्रातिशाख्ये स्पर्शोष्मान्तस्थायोगवाहजिह्वामूलीयोपध्मानीयानुस्वार-विसर्जनीयनासिक्ययमादयो भेदाः वर्त्तन्ते। पुनः प्रातिशाख्यान्तरे व्यञ्जनभेदविषये विविधत्वं परिदृश्यते। दाशतयीप्रातिशाख्ये स्पर्शान्तस्थःऊष्मेति भेदत्रयं दृश्यते। तैत्तिरीयप्रातिशाख्ये पूर्वोक्तं भेदत्रयं उल्लिखितम्। सामवेदीयगौतमीशिक्षायां व्यञ्जनानां एतत् भेदत्रयमुल्लिखितम्। स्पर्शान्तस्थोष्माणश्चेति इति। काशिकाकारादिव्याख्याकारेण प्रातिशाख्यशिक्षाप्रभृति ग्रन्थाधारेण पूर्वोक्त नवसङ्ख्यकाः भेदाः स्वीकृताः।
कुत्रापि प्रातिशाख्ये अन्तस्थवर्णानां विषये वैमत्यं न प्राप्यते। परन्तु ऊष्मवर्णानां विषये प्रातिशाख्यकाराणां न मतैक्यम्। पूर्वत्रासिद्धम् (अष्टा. ८/२/१) सूत्रस्य व्याख्यानावसरे भट्टोजीदीक्षितेनोक्तम् 'शषसहा ऊष्माणः' इति। अतः ऊष्माणां सङ्ख्या चतस्र एव। ऋ. प्रातिशाख्ये 'उत्तरेऽष्टा ऊष्माणः' इति उक्त्या अष्टसङ्ख्यकाः ऊष्मवर्णाः गृहीताः श ष स ह अः अं )(क )(प । तै. प्रातिशाख्ये 'परे षडुष्माणः' इति सूत्रे एतेषां सङ्ख्या षट् मध्ये सीमिता श ष स ह)(क)(प। वा. प्रातिशाख्ये चत्वार ऊष्माणः स्वीकृताः।

**सङ्ख्या**

यथा भेदविषये वैमत्यं परिलक्षते तथा सङ्ख्याविषये एव। पाणिनिना ३३ सङ्ख्यकाः व्यञ्जनवर्णाः उदिताः। तै. प्रातिशाख्ये ३५ प२५ (स्पर्शाः) अ ४ (अन्तस्थाः) अ ६ (ऊष्माणः) उ ३५फ एव । ऋ. प्रातिशाख्ये एतेषां सङ्ख्या ३७ एव। वा. प्रातिशाख्ये तु सर्वाधिक ४२ प२५ (स्पर्शाः) अ ४ (अन्तस्थाः) अ ४ (ऊष्माणः) अ ५ (अयोगवाहाः) अ ४ (यमाः) उ ४२फ सङ्ख्यकानि व्यञ्जनानि निर्देशितानि। अथर्ववेदप्रातिशाख्ये स्पर्शादिग्रहणत्वेन परोक्षेण तेषां स्थितिः स्वीकृता। सामवेदीयगौतमीशिक्षायां व्यञ्जनानां सङ्ख्या ३३ इति उल्लिखितम्।

अथ त्रयत्रिंशद्व्यञ्जनानि भवन्ति। स्पर्शान्तस्थोष्माणश्चेति। तत्र ककारादयो मकारान्ताः स्पर्शाः पञ्चविंशतिश्चत्वारोऽन्तस्थास्तेयरलवाश्चत्वारश्चोष्माणस्ते हशषसाश्चेत्यनेकं यत्रोपर्युपरिसंयुक्तं तत्संयोगसंज्ञं भवति इति (गौ. शि. १)।

**वर्णानां सङ्ख्याविषये शिक्षाशास्त्राणां निष्कर्षः**

पाणिनीयशिक्षायां वर्णानां सङ्ख्या त्रिषष्टि चतुष्षष्टिर्वा निर्दिष्टा। तथा चोक्तम्-

त्रिषष्टिश्चतुष्षष्टिर्वा वर्णाः शम्भुमते मताः।
प्राकृते संस्कृते चापि स्वयं प्रोक्ता स्वयम्भुवा।।
स्वरा विंशतिरेकश्च स्पर्शानां पञ्चविंशतिः।
यादयश्च स्मृता ह्यष्टौ चत्वारश्च यमाः स्मृताः।।
अनुस्वारो विसर्गश्च )(क )(पौ चापि पराश्रयौ।
दुःस्पृष्टश्चेति विज्ञेयो ऌकारः प्लुत एव च।। (पा. शि. ३-५)

अयमाशयः, अ इ उ ऋ एते वर्णा ह्रस्वदीर्घप्लुतभेदेन प्रत्येकं त्रिधा, इति द्वादश। ऌकारो ह्रस्व एवैकः। ए ऐ ओ औ, एते वर्णा दीर्घप्लुतभेदेन प्रत्येकं द्विधा, इति अष्टौ, इति एकविंशति स्वराः। अतोऽग्रे व्यञ्जनसङ्ख्या विचारः।
एते च ककारादि हकारान्ता लोके प्रसिद्धा एव त्रयस्त्रिंशत्सङ्ख्यकाः। तत्र कादयो मावसानाः पञ्चविंशतिः स्पर्शाः, ततश्चत्वारोऽन्तःस्थाः यरलवाः, ततश्चत्वार ऊष्माणाः शषसहाः, चत्वारश्च यमसंज्ञका वेदे एव प्रसिद्धाः। अनुस्वारः, विसर्गः, जिह्वामूलीयम्, उपध्मानीय एते चत्वारो वर्णाः यमसहिता एते अयोगवाहपदेनापि उच्यन्ते, दुःस्पृष्टसंज्ञक एको वर्णः। स च 'अग्निमीळे' इत्यादौ प्रयुज्यमानो डकारस्थानीयो ळ कारः। एतेषां सङ्कलने त्रिषष्टिवर्णाः भवन्ति। प्लुतऌकारस्यापि योजनया चतुष्षष्टिसङ्ख्या भवति। अयं पक्षः प्लुतऌकारस्वीकारमूलकः। वर्णरत्नप्रदीपिका-शिक्षायामपि त्रिषष्टिर्वर्णाः प्रतिपादिताः। तत्र न केवलं प्लुतऌकारस्य अपि तु रङ्गवर्णस्यापि निर्देशो नास्ति।
षोडशश्लोकीशिक्षायामपि त्रिषष्टिरेव वर्णाः परिसङ्ख्याताः। ते च द्वाविंशतिः स्वराः, त्रयस्त्रिंशद् व्यञ्जनानि, चत्वारो यमाः, अनुस्वारविसर्ग-जिह्वामूलीयोपध्मानीयाश्च। अत्र स्वराणां द्वाविंशतिसङ्ख्या-कथनेन दीर्घऌकारस्य स्वीकारो नास्तीति प्रतीयते।
गौतमीशिक्षायां त्रयस्त्रिंशद् व्यञ्जनानि, चत्वारो यमाश्च निर्दिष्टाः, स्वराणां निर्देशेऽपि सङ्ख्या न निर्दिष्टा, रङ्गाभिधेयेऽपि वर्णो नात्र निर्दिष्टः। तथापि अप्रतिषिद्धं

परमतमनुपमिति नियमेन पणिनीयादिशिक्षावदेव सङ्ख्याविषये व्यवस्था मन्तव्या। स्वराष्टकशिक्षायामष्टौ स्वरा उक्ताः। व्यञ्जनानां निर्देशे तु सङ्ख्या नोक्ता। अन्ते प्रत्याहारसूत्राणि लिखितानि। तेन ज्ञायते यत् पाणिनीयवर्णसङ्ख्याविषये एव सम्मतिरस्याः शिक्षायाः।

याज्ञवल्क्यशिक्षायां स्वराः, स्पर्शाः, अन्तस्थाः, ऊष्माणः प्रभृति वर्णानां निर्देशः अस्ति। ततश्च- अनुस्वारजिह्वामूलीयोपध्मानीयनासिक्यानुनासिक्यरङ्गा यमाश्चापि सन्ति प्रतिपादिताः। परन्तु सङ्कलनं कृत्वा सङ्ख्या नोक्ता। अस्यां स्थितौ 'अप्रतिषिद्धं परमतमनुमतं भवति' इति न्यायेन अष्टषष्टिर्वर्णा एतन्मते वक्तुं शक्यते। तथा हि दीर्घलृकारस्य सङ्ग्रहेण त्रयोविंशतिः स्वराः, त्रयस्त्रिंशत् स्पर्शान्तःस्थोष्माणः, विसर्गजिह्वामूलीयोपध्मानीयनासिक्यानुनासिक्यरङ्गा इति षट्, चत्वारो यमाः, ह्रस्वो दीर्घश्चेति द्वावनुस्वारौ-एते सङ्कलिता अष्टषष्टिर्भवति।

पाराशरीशिक्षायां एकाशीति (८१) वर्णानां संख्या निर्दिष्टा यथा छ

अक्षराशीतिरेकश्च प्रथमा कण्डिका स्मृता (पारा. शि. ३)

पारिशिक्षायां षड्पञ्चाशत् (५६) वर्णा इति स्वीकृताः ।

अथ वर्णसमाम्नाय उच्यते याजुषोऽत्र तु
स्वरास्पर्शास्तथान्तस्थाउष्माणश्चाथ दर्शिताः ।
विसर्गानुस्वारळाशानुनासिक्याः पञ्च चोदिताः
ह्रस्वदीर्घप्लुता वर्णे वर्णो वर्णा ऋ ॠ ऌ च ।
एदैदादौदिति ज्ञेयाः षोडशोहादितः स्वराः
कखौ गघौ ङच छजझञौ टठडढाणतौ ।
यदौदधौ पफबभौमस्पर्शाः पञ्चविंशतिः
यरौ लवौ चतस्रोऽन्तस्थाश्च :कः शषसःपहा
षडूष्माणो विसर्गोऽनुस्वारो लोनास्य पञ्चकम् (पारिशिक्षा)

लोमशी-पाराशरी-लघ्वमोघनन्दिनीशिक्षासु ह्रस्वदीर्घभेदेन अनुस्वारस्य द्वैविध्यं प्रतिपादितमस्ति। पाणिनीयशिक्षायां तु एकविध एवानुस्वार उक्त इति विवेकः।

इदमत्रावधातव्यम्- वर्णानां स्वरूपसङ्ख्यादिविषये योऽयं विरोधो दृश्यते, तत्रेदं समाधानं सामान्यतो ज्ञेयम्- यत् स्थानादिभेदेन स्थानादीनामन्यान्यरूपेण साङ्कर्येण विद्यमाना अनन्ता वर्णाः, न तान् साकल्येन कश्चिदपि निश्चेतुं शक्नोति। न हि सर्वे वर्णाः सर्वत्रैव भाषासु वेदेषु वा प्रयुज्यते। अतः शिक्षादयोऽपि भाषाविशेष-शाखाविशेषविषयका एव। न तु भाषासामान्यविषयका वा इति स्वीकरणीयम्। ये वर्णा यत्र न निर्दिष्टाः, ते तन्मते सर्वथा न सन्ति, इति न मन्तव्यं, तच्छाखायामनुपयुक्तत्वान्न निर्दिष्टा इत्यवमन्तव्यम्।

अद्यापि बहवः अपभ्रष्टाः वर्णाः उच्चार्यन्ते, तेषां साधुत्वमत्र संस्कृतवाङ्मये नास्ति, पुनः तदुच्चारणे पुण्यविशेषवाप्तिरपि न भवति।

प्रत्येकभाषायां लिखितं साहित्य-विज्ञानतन्निर्दिष्टवर्णमाध्यमेन एव । यथा पाणिन्यनुसारं वर्णः भवति ६५ संख्यकाः । अत्र ध्यातव्यं यत् पाणिनीकृताष्टाध्यायीग्रन्थस्य केवलं ४००० सूत्रै समस्तसंस्कृतवाङ्मयः शृङ्खलितः। येन अस्माकं ज्ञानाधारं अद्यावधि सुरक्षितः संरक्षितश्च तिष्ठति।

**व्यवहृतपुस्तकविवरणम्**


1. The *Atharvaveda Pr¡ti¿¡khya áaunak¢y¡ Catur¡dhy¡yik¡* (text translation and Notes by William D. Whitney, Chowkhamba Sanskrit Series Office, Varanasi, Third Edition 2002
2. अथर्ववेदसंहिता (मन्त्रानुक्रमण्या सहितं), नाग प्रकाशन, दिल्ली, १९९४.
3. अष्टाध्यायीसूत्रपाठः, वार्त्तिक-गणपाठ-धातुपाठ-पाणिनीयशिक्षा परिभाषापाठसहिता, शंकर राम शास्त्री, श्री बालमनोरमा मुद्रणालय, मैलापुर, मद्रास्, १९३७
4. ऋग्वेदप्रातिशाख्यम्- उव्वटभाष्यं संवलितं - अनुवादकः - डा. वीरेन्द्र कुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, १९९९
5. कात्यायनीयशुक्लयजुःप्रातिशाख्यस्य श्रीरामशर्मणा प्रणीता ज्योत्स्नावृत्तिः, सम्पादकः - ड. युगलकिशोरमिश्रः, सम्पूर्णानन्दसंस्कृतविश्वविद्यालय प्रकाशन, वाराणसी, १९८०
6. तैत्तिरीयप्रातिशाख्यम्- त्रिभाष्यरत्नं-वैदिकाभरण व्याख्याद्वयोपेतम्, श्री आर् रामशास्त्रिणा श्री के. रङ्गाचार्येण च सम्पादितम्, मोतीलाल बनारसीदास, दिल्ली, १९८५
7. तैत्तिरीयप्रातिशाख्यम्- माहिषेयकृतपदक्रमसदनाख्यभाष्योपेतं - सम्पादकः - पण्डित वे. वेङ्कटरामशर्मन्, मद्रास विश्वविद्यालय प्रकाशन, १९३९
8. वाजसनेयिप्रातिशाख्यम् अथवा शुक्लयजुर्वेदप्रातिशाख्यम् - भाष्यद्वयसहितम्, सम्पादकः एवं व्याख्याकारः डा. वीरेन्द्र कुमार वर्मा, चौखम्बा संस्कृत प्रतिष्ठान, दिल्ली, २००१
9. वाजसनेयप्रातिशाख्य एक परिशीलनम्, लेखकः - डा. युगलकिशोरमिश्रः, सम्पूर्णानन्द संस्कृतविश्वविद्यालय प्रकाशन, वाराणसी, १९९७
10. शिक्षासंग्रहः महर्षियाज्ञवल्क्यादिविरचितः; आचार्य श्रीरामप्रसादत्रिपाठी (संकलयिता सम्पादकश्च), सम्पूर्णानन्द संस्कृतविश्वविद्यालय प्रकाशन, वाराणसी, १९८९
11. *Veda-LakÀa¸a: Vedic Ancillary Literature – A Descriptive Bibliography*, compiled by K. Parameswara Aithal, MLBD. Delhi. 1993